॥ श्री नृसिंहकृपावलॊकनप्रार्थनास्तुतिः ॥

श्री कृष्ण उवाच -

सुलभॊ भक्तियुक्तानां दुर्दर्शॊ दुष्टचॆतसाम ।
अनन्यगतिकानां च प्रभुः भक्तैकवत्सलः ॥ १ ॥

शनैश्चरस्तत्र नृसिंहदॆवस्तुतिं चकारामलचित्तवृत्तिः ।
प्रणम्य साष्टांगमशॆषलॊककिरीटनीराजितपादपद्मम ॥ २ ॥

शनिरुवाच -

यत्पादपंकजरजः परमादरॆण
संसॆवितं सकलकल्मषराशिनाशम ।
कल्याणकारणमशॆषनिजानुगानां
स त्वं नृसिंह मयि धॆहि कृपावलॊकम ॥ ३ ॥

सर्वत्र चंचलतया स्थितया च लक्ष्म्या
ब्रह्मादिवंद्यपदया स्थिरया न्यसॆवि ।
पादारविंदयुगलम परमादरॆण
स त्वं नृसिंह मयि धॆहि कृपावलॊकम ॥ ४ ॥

www.yousigma.com

यद्रूपमागमशिरःप्रतिपाद्यमाद्य-
माध्यात्मिकादिपरितापहरं विचिंत्यम ।
यॊगीश्वरैरपगताखिलदॊषसंघैः
स त्वं नृसिंह मयि धॆहि कृपावलॊकम ॥ ५ ॥

प्रह्लादभक्तवचसा हरिराविरासीः
स्तंभॆ हिरण्यकशिपुं य उदारभावः ।
ऊर्वॊर्निधाय तदुरे नखरैर्ददार
स त्वं नृसिंह मयि धॆहि कृपावलॊकम ॥ ६ ॥

यॊ नैजभक्तमनलांबुधिभूधरॊग्र-
शृंगप्रपातविषदंतिसरीसृपॆभ्यः ।
सर्वात्मकः परमकारुणिकॊ ररक्ष
स त्वं नृसिंह मयि धॆहि कृपावलॊकम ॥ ७ ॥

यन्निर्विकारपररूपविचिंतनॆन
यॊगीश्वरा विषयवीतसमस्तरागाः ।
विश्रांतिमापुरविनाशवतीं पराख्यां
स त्वं नृसिंह मयि धॆहि कृपावलॊकम ॥ ८ ॥

www.yousigma.com

यद्रूपमुग्रमरिमर्दनभावशालि-
संचिंतनॆन सकलाहवभीतिहारि ।
भूतज्वरग्रहसमुद्भवभीतिनाशं
स त्वं नृसिंह मयि धॆहि कृपावलॊकम ॥ ९ ॥

यस्यॊत्तमं यश उमापतिपद्मजन्म-
शक्रादिदैवतसभासु समस्तगीतम ।
श्रुत्यैव सर्वशमलप्रशमैकदक्षं
स त्वं नृसिंह मयि धॆहि कृपावलॊकम ॥ १० ॥

श्री कृष्ण उवाच -

ऎवं श्रुत्वा स्तुतिं दॆवः शनिना कल्पितां हरिः ।
उवाच ब्रह्मवृंदस्थं शनिं सद्भक्तवत्सलः ॥ ११ ॥

श्री नृसिंह उवाच -

प्रसन्नॊहं शनॆ तुभ्यं वरं वरय शॊभनम ।
यं वांछसि तमॆव त्वं सर्वलॊकहितावहम ॥ १२ ॥

श्री शनैश्चर उवाच -

www.yousigma.com

नृसिंह त्वं मयि कृपां कुरु देव दयानिधे ।
मद्वासरस्तवप्रीतिकरः स्याद्देवतापते ॥ १३ ॥

मत्कृतं त्वत्स्तवं ये वै शृण्वंति च पठंति च ।
सर्वान कामान पूरयेथास्तेषां त्वं लोकभावन ॥ १४ ॥

शइ नृसिंह उवाच -

तथैवास्तु शनेऽहं वै रक्षोभुवनमास्थितः ।
भक्तकामान पूरयिष्ये त्वं ममैकं वचः शृणुः ॥ १५ ॥

त्वत्कृतं मत्परं स्तोत्रं यः पठेच्च शृणोति यः ।
द्वादशाष्टमजन्मस्थं तद्भयं मास्तु तस्य वै ॥ १६ ॥

शनिर्नरहरिं देवं तथेति प्रत्युवाच ह ।
ततः परमसंतुष्टाः जयेति मुनयोऽवदन ॥ १७ ॥

शई नृसिंह उवाच -

इत्थं शनैश्चरस्याथ नृसिंहदेवसंवादमेतत स्तवनं च मानवः ।

श्रुणोति यः श्रावयते च भक्त्या सर्वान्यभीष्टानि च विंदते ध्रुवम ॥
१८ ॥

॥ इति भविष्योत्तरपुराणे रक्षोभुवनप्रस्तावे शनैश्चरकृता श्री नृसिंहकृपावलोकनप्रार्थनास्तुतिः ॥

www.yousigma.com